श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे

# ॥ त्रिचत्वारिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रिचत्वारिंशः सर्गः ॥

## भगीरथस्य तपसा तुष्टेन शिवेन गङ्गां शिरसि धारयित्वा तस्या बिन्दुसरोवरे त्यागस्तत्र स्वात्मानं सप्तसु धारासु संविभज्य भागीरथ्या भगीरथमनुगम्य तत्पितॄणामुद्धरणं च

देवदेवे गते तस्मिन् सोऽङ्गुष्ठाग्रनिपीडिताम्।
कृत्वा वसुमतीं राम वत्सरं समुपासत॥ **1.43.1** ॥

अथ संवत्सरे पूर्णे सर्वलोकनमस्कृतः।
उमापतिः पशुपती राजानमिदमब्रवीत्॥ **1.43.2** ॥

प्रीतस्तेऽहं नरश्रेष्ठ करिष्यामि तव प्रियम्।
शिरसा धारयिष्यामि शैलराजसुतामहम्॥ **1.43.3** ॥

ततो हैमवती ज्येष्ठा सर्वलोकनमस्कृता।
तदा सातिमहद्रूपं कृत्वा वेगं च दुःसहम्॥ **1.43.4** ॥

आकाशादपतद् राम शिवे शिवशिरस्युत।
अचिन्तयच्च सा देवी गङ्गा परमदुर्धरा॥ **1.43.5** ॥

विशाम्यहं हि पातालं स्रोतसा गृह्य शङ्करम्।
तस्यावलेपनं ज्ञात्वा क्रुद्धस्तु भगवान् हरः॥ **1.43.6** ॥

तिरोभावयितुं बुद्धिं चक्रे त्रिनयनस्तदा।
सा तस्मिन् पतिता पुण्या पुण्ये रुद्रस्य मूर्धनि॥ **1.43.7** ॥

हिमवत्प्रतिमे राम जटामण्डलगह्वरे।
सा कथञ्चिन्महीं गन्तुं नाशक्नोद् यत्नमास्थिता ॥ **1.43.8** ॥

नैव सा निर्गमं लेभे जटामण्डलमन्ततः।
तत्रैवाबभ्रमद् देवी संवत्सरगणान् बहून् ॥ **1.43.9** ॥

तामपश्यत् पुनस्तत्र तपः परममास्थितः।
स तेन तोषितश्चासीदत्यन्तं रघुनन्दन ॥ **1.43.10** ॥

विससर्ज ततो गङ्गां हरो बिन्दुसरः प्रति।
तस्यां विसृज्यमानायां सप्त स्रोतांसि जज्ञिरे ॥ **1.43.11** ॥

ह्लादिनी पावनी चैव नलिनी च तथैव च।
तिस्रः प्राचीं दिशं जग्मुर्गङ्गाः शिवजलाः शुभाः ॥ **1.43.12** ॥

सुचक्षुश्चैव सीता च सिन्धुश्चैव महानदी।
तिस्रश्चैता दिशं जग्मुः प्रतीचीं तु दिशं शुभाः ॥ **1.43.13** ॥

सप्तमी चान्वगात् तासां भगीरथरथं तदा।
भगीरथोऽपि राजर्षिर्दिव्यं स्यन्दनमास्थितः ॥ **1.43.14** ॥

प्रायादग्रे महातेजा गङ्गा तं चाप्यनुव्रजत्।
गगनाच्छङ्करशिरस्ततो धरणिमागता ॥ **1.43.15** ॥

असर्पत जलं तत्र तीव्रशब्दपुरस्कृतम्।
मत्स्यकच्छपसङ्घैश्च शिंशुमारगणैस्तथा ॥ **1.43.16** ॥

पतद्भिः पतितैश्चैव व्यरोचत वसुन्धरा।
ततो देवर्षिगन्धर्वा यक्षसिद्धगणास्तथा ॥ **1.43.17** ॥

व्यलोकयन्त ते तत्र गगनाद् गां गतां तदा।
विमानैर्नगराकारैर्हयैर्गजवरैस्तदा ॥ **1.43.18** ॥

पारिप्लवगताश्चापि देवतास्तत्र विष्ठिताः।
तदद्भुतमिमं लोके गङ्गावतरमुत्तमम्॥ **1.43.19** ॥

दिदृक्षवो देवगणाः समीयुरमितौजसः।
सम्पतद्भिः सुरगणैस्तेषां चाभरणौजसा॥ **1.43.20** ॥

शतादित्यमिवाभाति गगनं गततोयदम्।
शिंशुमारोरगगणैर्मीनैरपि च चञ्चलैः॥ **1.43.21** ॥

विद्युद्भिरिव विक्षिप्तैराकाशमभवत् तदा।
पाण्डुरैः सलिलोत्पीडैः कीर्यमाणैः सहस्रधा॥ **1.43.22** ॥

शारदाभ्रैरिवाकीर्णं गगनं हंससम्प्लवैः।
क्वचिद् द्रुततरं याति कुटिलं क्वचिदायतम्॥ **1.43.23** ॥

विनतं क्वचिदुद्भूतं क्वचिद् याति शनैः शनैः।
सलिलेनैव सलिलं क्वचिदभ्याहतं पुनः॥ **1.43.24** ॥

मुहुरूर्ध्वपथं गत्वा पपात वसुधां पुनः।
तच्छङ्करशिरोभ्रष्टं भ्रष्टं भूमितले पुनः॥ **1.43.25** ॥

व्यरोचत तदा तोयं निर्मलं गतकल्मषम्।
तत्रर्षिगणगन्धर्वा वसुधातलवासिनः॥ **1.43.26** ॥

भवाङ्गपतितं तोयं पवित्रमिति पस्पृशुः।
शापात् प्रपतिता ये च गगनाद् वसुधातलम्॥ **1.43.27** ॥

कृत्वा तत्राभिषेकं ते बभूवुर्गतकल्मषाः।
धूतपापाः पुनस्तेन तोयेनाथ शुभान्विताः॥ **1.43.28** ॥

पुनराकाशमाविश्य स्वान् लोकान् प्रतिपेदिरे।
मुमुदे मुदितो लोकस्तेन तोयेन भास्वता॥ **1.43.29** ॥

कृताभिषेको गङ्गायां बभूव गतकल्मषः।
भगीरथो हि राजर्षिर्दिव्यं स्यन्दनमास्थितः॥ **1.43.30** ॥

प्रायादग्रे महाराजस्तं गङ्गा पृष्ठतोऽन्वगात्।
देवाः सर्षिगणाः सर्वे दैत्यदानवराक्षसाः॥ **1.43.31** ॥

गन्धर्वयक्षप्रवराः सकिन्नरमहोरगाः।
सर्पाश्चाप्सरसो राम भगीरथरथानुगाः॥ **1.43.32** ॥

गङ्गामन्वगमन् प्रीताः सर्वे जलचराश्च ये।
यतो भगीरथो राजा ततो गङ्गा यशस्विनी॥ **1.43.33** ॥

जगाम सरितां श्रेष्ठा सर्वपापप्रणाशिनी।
ततो हि यजमानस्य जह्नोरद्भुतकर्मणः॥ **1.43.34** ॥

गङ्गा सम्प्लावयामास यज्ञवाटं महात्मनः।
तस्यावलेपनं ज्ञात्वा क्रुद्धो जह्नुश्च राघव॥ **1.43.35** ॥

अपिबत् तु जलं सर्वं गङ्गायाः परमाद्भुतम्।
ततो देवाः सगन्धर्वा ऋषयश्च सुविस्मिताः॥ **1.43.36** ॥

पूजयन्ति महात्मानं जह्नुं पुरुषसत्तमम्।
गङ्गां चापि नयन्ति स्म दुहितृत्वे महात्मनः॥ **1.43.37** ॥

ततस्तुष्टो महातेजाः श्रोत्राभ्यामसृजत् प्रभुः।
तस्माज्जह्नुसुता गङ्गा प्रोच्यते जाह्नवीति च॥ **1.43.38** ॥

जगाम च पुनर्गङ्गा भगीरथरथानुगा।
सागरं चापि सम्प्राप्ता सा सरित्प्रवरा तदा॥ **1.43.39** ॥

रसातलमुपागच्छत् सिद्ध्यर्थं तस्य कर्मणः।
भगीरथोऽपि राजर्षिर्गङ्गामादाय यत्नतः॥ **1.43.40** ॥

पितामहान् भस्मकृतानपश्यद् गतचेतनः।
अथ तद्भस्मनां राशिं गङ्गासलिलमुत्तमम्।
प्लावयत् पूतपाप्मानः स्वर्गं प्राप्ता रघूत्तम॥ **1.43.41**॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये बालकाण्डे त्रिचत्वारिंशः सर्गः॥